# तत्त्वार्थसूत्रम्
# Tattvārthasūtram
## परिशिष्ट : प्रथम
## Appendix No. 1
# तत्त्वार्थसूत्रगत सूत्रपाठ
## Recitation of Sūtras of Tattvārthasūtra

**तत्त्वार्थसूत्र के प्रारम्भ में पठनीय पद्य**

त्रैकाल्यं[1] द्रव्यषट्कं नवपदसहितं जीवषट्कायलेश्याः।
पञ्चान्ये चास्तिकाया व्रतसमितिगतिज्ञानचारित्रभेदाः।।
इत्येतन्मोक्षमूलं त्रिभुवनमहितैः प्रोक्तमर्हद्भिरीशैः।
प्रत्येति श्रद्दधाति स्पृशति च मतिमान् यः स वै शुद्धदृष्टिः।।
सिद्धे जयप्पसिद्धे, चउव्विहाराहणाफलं पत्ते।
वंदित्ता अरहंते, वोच्छं आराहणा कमसो।।
उज्जोवणमुज्जवणं, णिव्वहणं साहणं च णिच्छरणं।
दंसणणाणचरित्तं, तवाणमाराहणा भणिया।।

**मोक्षमार्गस्य नेतारं, भेत्तारं कर्मभूभृताम्।**
**ज्ञातारं विश्वतत्त्वानां, वन्दे तद्गुणलब्धये।।**

सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः।।१।। तत्त्वार्थश्रद्धानं सम्यग्दर्शनम्।।२।। तन्निसर्गादधिगमाद्वा।।३।। जीवाजीवास्रवबन्धसंवरनिर्जरामोक्षास्तत्त्वम्।।४।। नाम-स्थापनाद्रव्यभावतस्तन्न्यासः।।५।। प्रमाणनयैरधिगमः।।६।। निर्देशस्वामित्वसाधना-ऽधिकरणस्थितिविधानतः।।७।। सत्सङ्ख्याक्षेत्रस्पर्शनकालान्तरभावाल्प -बहुत्वैश्च।।८।। मतिश्रुतावधिमनःपर्ययकेवलानि ज्ञानम्।।९।। तत्प्रमाणे।।१०।। आद्ये परोक्षम्।।११।। प्रत्यक्षमन्यत्।।१२।। मतिः स्मृतिः सञ्ज्ञा चिन्ताऽभिनिबोध इत्यनर्थान्तरम्।।१३।। तदिन्द्रियानिन्द्रियनिमित्तम्।।१४।। अवग्रहेहाऽवाय-धारणाः।।१५।। बहुबहुविधक्षिप्राऽनिःसृताऽनुक्तध्रुवाणां सेतराणाम्।।१६।।

---
१. ये प्रारम्भिक पद्य पर्यूषण/दशलक्षण पर्व में या सामान्य तौर से भी तत्त्वार्थसूत्र का पाठ करने वाले लोगों की सुविधा हेतु अन्यत्र से उद्धृत किये गये हैं। इसी प्रकार अन्त में भी कुछ पद्य उद्धृत किये गये हैं।

अर्थस्य।।१७।। व्यञ्जनस्यावग्रहः।।१८।। न चक्षुरनिन्द्रियाभ्याम्।।१९।। श्रुतं मतिपूर्वं द्व्यनेकद्वादशभेदम्।।२०।। भवप्रत्ययोऽवधिर्देवनारकाणाम्।।२१।। क्षयोपशमनिमित्तः षड्विकल्पः शेषाणाम्।।२२।। ऋजुविपुलमती मनःपर्ययः।।२३।। विशुद्ध्यप्रति–पाताभ्यां तद्विशेषः।।२४।। विशुद्धिक्षेत्रस्वामिविषयेभ्योऽवधिमनःपर्यायोः।।२५।। मतिश्रुतयोर्निबन्धो द्रव्येष्वसर्वपर्यायेषु।।२६।। रूपिष्ववधेः।।२७।। तदनन्तभागे मनः–पर्ययस्य।।२८।। सर्वद्रव्यपर्यायेषु केवलस्य।।२९।। एकादीनि भाज्यानि युगपदेकस्मिन्ना चतुर्भ्यः।।३०।। मतिश्रुतावधयो विपर्ययश्च।।३१।। सदसतोरविशेषाद्यदृच्छोपलब्धे–रुन्मत्तवत्।।३२।। नैगमसङ्ग्रहव्यवहारर्जुसूत्रशब्दसमभिरूढैवम्भूता नयाः।।३३।।

**इति तत्त्वार्थसूत्रे प्रथमोऽध्यायः।।१।।**

औपशमिकक्षायिकौ भावौ मिश्रश्च जीवस्य स्वतत्त्वमौदयिकपारिणामिकौ च।।१।। द्विनवाष्टादशैकविंशतित्रिभेदा यथाक्रमम्।।२।। सम्यक्त्वचारित्रे।।३।। ज्ञान–दर्शनदानलाभभोगोपभोगवीर्याणि च।।४।। ज्ञानाज्ञानदर्शनलब्धयश्चतुस्त्रित्रिपञ्चभेदाः सम्यक्त्वचारित्रसंयमासंयमाश्च ।।५।। गतिकषायलिङ्गमिथ्यादर्शनाज्ञानासंयता–सिद्धलेश्याश्चतुश्चतुस्त्र्येकैकैकैकषड्भेदाः।।६।। जीवभव्याभव्यत्वानि च ।।७।। उपयोगो लक्षणम्।।८।। स द्विविधोऽष्टचतुर्भेदः ।।९।। संसारिणो मुक्ताश्च ।।१०।। समनस्काऽमनस्काः।।११।। संसारिणस्त्रसस्थावराः।।१२।। पृथिव्यप्तेजोवायुवन–स्पतयः स्थावराः।।१३।। द्वीन्द्रियादयस्त्रसाः।।१४।। पञ्चेन्द्रियाणि।।१५।। द्विविधानि।।१६।। निर्वृत्त्युपकरणे द्रव्येन्द्रियम्।।१७।। लब्ध्युपयोगौ भावेन्द्रियम्।।१८।। स्पर्शनरसनघ्राणचक्षुःश्रोत्राणि।।१९।। स्पर्शरसगन्धवर्णशब्दास्तदर्थाः।।२०।। श्रुतमनिन्द्रियस्य।।२१।। वनस्पत्यन्तानामेकम्।।२२।। कृमिपिपीलिकाभ्रमरमनुष्या–दीनामेकैकवृद्धानि।।२३।। सञ्ज्ञिनः समनस्काः।।२४।। विग्रहगतौ कर्मयोगः।।२५।। अनुश्रेणि गतिः।।२६।। अविग्रहा जीवस्य।।२७।। विग्रहवती च संसारिणः प्राक् चतुर्भ्यः।।२८।। एकसमयाऽविग्रहा।।२९।। एकं द्वौ त्रीन्वाऽनाहारकः।।३०।। सम्मूर्च्छनगर्भोपपादा जन्म ।।३१।। सचित्तशीतसंवृताः सेतरा मिश्राश्चैक–शस्तद्योनयः।।३२।। जरायुजाण्डजपोतानां गर्भः।।३३।। देवनारकाणामुपपादः।।३४।। शेषाणां सम्मूर्च्छनम्।।३५।। औदारिकवैक्रियिकाहारकतैजसकार्मणानि शरीराणि।।३६।। परं परं सूक्ष्मम्।।३७।। प्रदेशतोऽसङ्ख्येयगुणं प्राक् तैजसात्।।३८।। अनन्तगुणे परे।।३९।। अप्रतीघाते।।४०।। अनादिसम्बन्धे च।।४१।। सर्वस्य।।४२।। तदादीनि भाज्यानि युगपदेकस्मिन्नाचतुर्भ्यः।।४३।। निरुपभोगमन्त्यम्।।४४।।

गर्भसम्मूर्च्छनज माद्यम्।।४५।। औपपादिकं वैक्रियिकम्।।४६।। लब्धिप्रत्ययं च।।४७।। तैजसमपि।।४८।। शुभं विशुद्धमव्याघाति चाहारकं प्रमत्तसंयतस्यैव।।४९।। नारकसम्मूर्च्छिनो नपुंसकानि।।५०।। न देवाः।।५१।। शेषास्त्रिवेदाः।।५२।। औपपादिकचरमोत्तमदेहाऽसङ्ख्येयवर्षायुषोऽनपवर्त्यायुषः।।५३।।

**इति तत्त्वार्थसूत्रे द्वितीयोऽध्यायः।।२।।**

रत्नशर्करावालुकापङ्कधूमतमोमहातमःप्रभा भूमयो घनाम्बुवाताकाशप्रतिष्ठाः सप्ताऽधोऽधः।।१।। तासु त्रिंशत्पञ्चविंशतिपञ्चदशदशत्रिपञ्चोनैकनरकशतसहस्राणि पञ्च चैव यथाक्रमम्।।२।। नारका नित्याऽशुभतरलेश्यापरिणामदेहवेदनाविक्रियाः।।३।। परस्परोदीरितदुःखाः।।४।। सङ्क्लिष्टाऽसुरोदीरितदुःखाश्च प्राक् चतुर्थ्याः।।५।। तेष्वेकत्रिसप्तदशसप्तदशद्वाविंशतित्रयस्त्रिंशत्सागरोपमा सत्त्वानां परा स्थितिः।।६।। जम्बूद्वीपलवणोदादयः शुभनामानो द्वीपसमुद्राः।।७।। द्विर्द्विर्विष्कम्भाः पूर्वपूर्वपरिक्षेपिणो वलयाकृतयः।।८।। तन्मध्ये मेरुनाभिर्वृत्तो योजनशतसहस्रविष्कम्भो जम्बूद्वीपः।।९।। भरतहैमवतहरिविदेहरम्यकहैरण्यवतैरावतवर्षाः क्षेत्राणि।।१०।। तद्विभाजिनः पूर्वा-परायता हिमवन्महाहिमवन्निषधनीलरुक्मिशिखरिणो वर्षधरपर्वताः।।११।। हेमार्जुनत-पनीयवैडूर्यरजतहेममयाः।।१२।। मणिविचित्रपार्श्वा उपरि मूले च तुल्य-विस्ताराः।।१३।। पद्ममहापद्मतिगिञ्छकेसरिमहापुण्डरीकपुण्डरीका ह्रदास्तेषामु-परि।।१४।। प्रथमो योजनसहस्रायामस्तदर्द्धविष्कम्भो ह्रदः।।१५।। दशयोजनाव-गाहः।।१६।। तन्मध्ये योजनं पुष्करम्।।१७।। तद्द्विगुणद्विगुणा ह्रदाः पुष्कराणि च।।१८।। तन्निवासिन्यो देव्यः श्रीह्रीधृतिकीर्तिबुद्धिलक्ष्म्यः पल्योपमस्थितयः ससामानिकपरिषत्काः।।१९।। गङ्गासिन्धुरोहिद्रोहितास्याहरिद्धरिकान्तासीतासीतोदाना-रीनरकान्तासुवर्णरूप्यकूलारक्तारक्तोदाः सरितस्तन्मध्यगाः।।२०।। द्वयोर्द्वयोः पूर्वाः पूर्वगाः।।२१।। शेषास्त्वपरगाः।।२२।। चतुर्दशनदीसहस्रपरिवृता गङ्गासिन्ध्वादयो नद्यः।।२३।। भरतः षड्विंशतिपञ्चयोजनशतविस्तारः षट् चैकोनविंशतिभागा योजनस्य।।२४।। तद्द्विगुणद्विगुणविस्तारा वर्षधरवर्षा विदेहान्ताः।।२५।। उत्तरा दक्षिणतुल्याः।।२६।। भरतैरावतयोर्वृद्धिह्रासौ षट्समयाभ्यामुत्सर्पिण्यवसर्पिणी-भ्याम्।।२७।। ताभ्यामपरा भूमयोऽवस्थिताः।।२८।। एकद्वित्रिपल्योपमस्थितयो हैमवतकहारिवर्षकदैवकुरवकाः।।२९।। तथोत्तराः।।३०।। विदेहेषु सङ्ख्येय-कालाः।।३१।। भरतस्य विष्कम्भो जम्बूद्वीपस्य नवतिशतभागः।।३२।। द्विर्धातकीखण्डे।।३३।। पुष्करार्द्धे च ।।३४।। प्राङ्मानुषोत्तरान्मनुष्याः।।३५।। आर्या

म्लेच्छाश्च।।३६।। भरतैरावतविदेहाः कर्मभूमयोऽन्यत्र देवकुरूत्तरकुरुभ्यः।।३७।। नृस्थिती परावरे त्रिपल्योपमान्तर्मुहूर्ते।।३८।। तिर्यग्योनिजानां च।।३९।।

**इति तत्त्वार्थसूत्रे तृतीयोऽध्यायः।।३।।**

देवाश्चतुर्णिकायाः।।१।। आदितस्त्रिषु पीतान्तलेश्याः।।२।। दशाष्टपञ्चद्वादश–विकल्पाः कल्पोपपन्नपर्यन्ताः।।३।। इन्द्रसामानिकत्रायस्त्रिंशपारिषदात्मरक्षलोक–पालानीकप्रकीर्णकाभियोग्यकिल्विषिकाश्चैकशः।।४।। त्रायस्त्रिंशलोकपालवर्ज्या व्यन्तरज्योतिष्काः।।५।। पूर्वयोर्द्वीन्द्राः।।६।। कायप्रवीचारा आ ऐशानात्।।७।। शेषाः स्पर्शरूपशब्दमनःप्रवीचाराः।।८।। परेऽप्रवीचाराः।।९।। भवनवासिनोऽसुरनाग–विद्युत्सुपर्णाग्निवातस्तनितोदधिद्वीपदिक्कुमाराः।।१०।। व्यन्तराः किन्नरकिम्पुरुष–महोरगगन्धर्वयक्षराक्षसभूतपिशाचाः।।११।। ज्योतिष्काः सूर्याचन्द्रमसौ ग्रहनक्षत्र–प्रकीर्णकतारकाश्च।।१२।। मेरुप्रदक्षिणा नित्यगतयो नृलोके।।१३।। तत्कृतः कालविभागः।।१४।। बहिरवस्थिताः।।१५।। वैमानिकाः।।१६।। कल्पोपपन्नाः कल्पातीताश्च।।१७।। उपर्युपरि।।१८।। सौधर्मैशानसानत्कुमारमाहेन्द्रब्रह्मब्रह्मोत्तर–लान्तवकापिष्ठशुक्रमहाशुक्रशतारसहस्रारेष्वानतप्राणतयोरारणाच्युतयोर्नवसु ग्रैवेयकेषु विजयवैजयन्तजयन्तापराजितेषु सर्वार्थसिद्धौ च।।१९।। स्थितिप्रभावसुखद्युतिलेश्या–विशुद्धीन्द्रियावधिविषयतोऽधिकाः।।२०।। गतिशरीरपरिग्रहाभिमानतो हीनाः।।२१।। पीतपद्मशुक्ललेश्या द्वित्रिशेषेषु।।२२।। प्राग्ग्रैवेयकेभ्यः कल्पाः।।२३।। ब्रह्मलोकालया लौकान्तिकाः।।२४।। सारस्वतादित्यवह्न्यरुणगर्दतोयतुषिताव्याबाधारिष्टाश्च।।२५।। विजयादिषु द्विचरमाः।।२६।। औपपादिकमनुष्येभ्यः शेषास्तिर्यग्योनयः।।२७।। स्थिति–रसुरनागसुपर्णद्वीपशेषाणां सागरोपमत्रिपल्योपमार्द्धहीनमिता।।२८।। सौधर्मैशानयोः सागरोपमे अधिके।।२९।। सानत्कुमारमाहेन्द्रयोः सप्त।।३०।। त्रिसप्तनवैकादश–त्रयोदशपञ्चदशभिरधिकानि तु।।३१।। आरणाच्युतादूर्ध्वमेकैकेन नवसु ग्रैवेयकेषु विजयादिषु सर्वार्थसिद्धौ च।।३२।। अपरा पल्योपममधिकम्।।३३।। परतः परतः पूर्वा पूर्वाऽनन्तरा।।३४।। नारकाणां च द्वितीयादिषु।।३५।। दशवर्षसहस्राणि प्रथमायाम्।।३६।। भवनेषु च।।३७।। व्यन्तराणां च।।३८।। परा पल्योपम–मधिकम्।।३९।। ज्योतिष्काणां च।।४०।। तदष्टभागोऽपरा।।४१।। लौकान्तिकानामष्टौ सागरोपमाणि सर्वेषाम्।।४२।।

**इति तत्त्वार्थसूत्रे चतुर्थोऽध्यायः।।४।।**

अजीवकाया धर्माधर्माकाशपुद्गलाः।।१।। द्रव्याणि।।२।। जीवाश्च।।३।। नित्यावस्थितान्यरूपाणि।।४।। रूपिणः पुद्गलाः।।५।। आ आकाशादेक-द्रव्याणि।।६।। निष्क्रियाणि च।।७।। असङ्ख्येयाः प्रदेशा धर्माधर्मैकजीवानाम्।।८।। आकाशस्यानन्ताः।।९।। सङ्ख्येयासङ्ख्येयाश्च पुद्गलानाम्।।१०।। नाणोः।।११।। लोकाकाशेऽवगाहः।।१२।। धर्माधर्मयोः कृत्स्ने।।१३।। एकप्रदेशादिषु भाज्यः पुद्गलानाम्।।१४।। असङ्ख्येयभागादिषु जीवानाम्।।१५।। प्रदेशसंहारविसर्प्पाभ्यां प्रदीपवत्।।१६।। गतिस्थित्युपग्रहौ धर्माधर्मयोरुपकारः।।१७।। आकाशस्याव-गाहः।।१८।। शरीरवाङ्मनःप्राणापानाः पुद्गलानाम्।।१९।। सुखदुःखजीवितमरणोप-ग्रहाश्च।।२०।। परस्परोपग्रहो जीवानाम्।।२१।। वर्तनापरिणामक्रियाः परत्वापरत्वे च कालस्य।।२२।। स्पर्शरसगन्धवर्णवन्तः पुद्गलाः।।२३।। शब्दबन्धसौक्ष्म्य-स्थौल्यसंस्थानभेदतमश्छायाऽऽतपोद्योतवन्तश्च।।२४।। अणवः स्कन्धाश्च।।२५।। भेदसङ्घातेभ्य उत्पद्यन्ते।।२६।। भेदादणुः।।२७।। भेदसङ्घाताभ्यां चाक्षुषः।।२८।। सद् द्रव्यलक्षणम्।।२९।। उत्पादव्ययध्रौव्ययुक्तं सत्।।३०।। तद्भावाव्ययं नित्यम्।।३१।। अर्पितानर्पितसिद्धेः।।३२।। स्निग्धरूक्षत्वाद् बन्धः।।३३।। न जघन्यगुणानाम्।।३४।। गुणसाम्ये सदृशानाम्।।३५।। द्व्यधिकादिगुणानां तु।।३६।। बन्धेऽधिकौ पारिणामिकौ च।।३७।। गुणपर्ययवद् द्रव्यम्।।३८।। कालश्च।।३९।। सोऽनन्तसमयः।।४०।। द्रव्याश्रया निर्गुणा गुणाः।।४१।। तद्भावः परिणामः।।४२।।

**इति तत्त्वार्थसूत्रे पञ्चमोऽध्यायः।।५।।**

कायवाङ्मनःकर्म योगः।।१।। स आस्रवः।।२।। शुभः पुण्यस्याशुभः पाप-स्य।।३।। सकषायाकषाययोः साम्परायिकेर्यापथयोः।।४।। इन्द्रियकषायाव्रतक्रियाः पञ्चचतुःपञ्चपञ्चविंशतिसङ्ख्याः पूर्वस्य भेदाः।।५।। तीव्रमन्दज्ञाताऽज्ञातभावाधिकरण-वीर्यविशेषेभ्यस्तद्विशेषः।।६।। अधिकरणं जीवाजीवाः।।७।। आद्यं संरम्भसमारम्भा-रम्भयोगकृतकारितानुमतकषायविशेषैस्त्रिस्त्रिस्त्रिश्चतुश्चैकशः।।८।। निर्वर्तनानिक्षेप-संयोगनिसर्गा द्विचतुर्द्वित्रिभेदाः परम्।।९।। तत्प्रदोषनिह्नवमात्सर्यान्तरायासादनोपघाता ज्ञानदर्शनावरणयोः।।१०।। दुःखशोकतापाक्रन्दनवधपरिदेवनान्यात्मपरोभयस्थान्य-सद्वेद्यस्य।।११।। भूतव्रत्यनुकम्पादानसरागसंयमादियोगः क्षान्तिः शौचमिति सद्वेद्यस्य।।१२।। केवलिश्रुतसङ्घधर्मदेवावर्णवादो दर्शनमोहस्य।।१३।। कषायोदया-त्तीव्रपरिणामश्चारित्रमोहस्य।।१४।। बह्वारम्भपरिग्रहत्वं नारकस्यायुषः।।१५।। माया तैर्यग्योनस्य।।१६।। अल्पारम्भपरिग्रहत्वं मानुषस्य।।१७।। स्वभावमार्दवं च।।१८।।

निःशीलव्रतत्वं च सर्वेषाम्।।१९।। सरागसंयमसंयमासंयमाकामनिर्जराबालतपांसि दैवस्य।।२०।। सम्यक्त्वं च।।२१।। योगवक्रता विसंवादनं चाशुभस्य नाम्नः।।२२।। तद्विपरीतं शुभस्य।।२३।। दर्शनविशुद्धिर्विनयसम्पन्नता शीलव्रतेष्वनतीचारोऽभीक्ष्ण-ज्ञानोपयोगसंवेगौ शक्तितस्त्यागतपसी साधुसमाधिर्वैयावृत्त्यकरणमर्हदाचार्यबहुश्रुत-प्रवचनभक्तिरावश्यकापरिहाणिर्मार्गप्रभावना प्रवचनवत्सलत्वमिति तीर्थकरत्व-स्य।।२४।। परात्मनिन्दाप्रशंसे सदसद्गुणोच्छादनोद्भावने च नीचैर्गोत्रस्य।।२५।। तद्विपर्ययो नीचैर्वृत्त्यनुत्सेकौ चोत्तरस्य।।२६।। विघ्नकरणमन्तरायस्य।।२७।।

**इति तत्त्वार्थसूत्रे षष्ठोऽध्यायः।।६।।**

हिंसाऽनृतस्तेयाब्रह्मपरिग्रहेभ्यो विरतिर्व्रतम्।।१।। देशसर्वतोऽणुमहती।।२।। तत्स्थैर्यार्थं भावनाः पञ्च पञ्च।।३।। वाङ्मनोगुप्तीर्यादाननिक्षेपणसमित्यालोकित-पानभोजनानि पञ्च।।४।। क्रोधलोभभीरुत्वहास्यप्रत्याख्यानान्यनुवीचीभाषणं च पञ्च।।५।। शून्यागारविमोचितावासपरोपरोधाकरणभैक्षशुद्धिसधर्माविसंवादाः पञ्च।।६।। स्त्रीरागकथाश्रवणतन्मनोहराङ्गनिरीक्षणपूर्वरतानुस्मरणवृष्येष्टरसस्वशरीरसंस्कारत्यागाः पञ्च।।७।। मनोज्ञामनोज्ञेन्द्रियविषयरागद्वेषवर्जनानि पञ्च।।८।। हिंसादिष्विहामुत्रा-पायावद्यदर्शनम्।।९।। दुःखमेव वा।।१०।। मैत्रीप्रमोदकारुण्यमाध्यस्थ्यानि च सत्त्व-गुणाधिकक्लिश्यमानाविनेयेषु।।११।। जगत्कायस्वभावौ वा संवेगवैराग्यार्थम्।।१२।। प्रमत्तयोगात्प्राणव्यपरोपणं हिंसा।।१३।। असदभिधानमनृतम्।।१४।। अदत्तादानं स्तेयम्।।१५।। मैथुनमब्रह्म।।१६।। मूर्च्छा परिग्रहः।।१७।। निःशल्यो व्रती।।१८।। अगार्यनगारश्च।।१९।। अणुव्रतोऽगारी।।२०।। दिग्देशानर्थदण्डविरतिसामायिक-प्रोषधोपवासोपभोगपरिभोगपरिमाणातिथिसंविभागव्रतसम्पन्नश्च।।२१।। मारणान्तिकीं सल्लेखनां जोषिता।।२२।। शङ्काङ्क्षाविचिकित्साऽन्यदृष्टिप्रशंसासंस्तवाः सम्यग्दृष्टेरतिचाराः।।२३।। व्रतशीलेषु पञ्च पञ्च यथाक्रमम्।।२४।। बन्धवधच्छेदा-तिभारारोपणान्नपाननिरोधाः।।२५।। मिथ्योपदेशरहोभ्याख्यानकूटलेखक्रियान्या-सापहारसाकारमन्त्रभेदाः।।२६।। स्तेनप्रयोगतदाहृतादानविरुद्धराज्यातिक्रमहीना-धिकमानोन्मानप्रतिरूपकव्यवहाराः।।२७।। परविवाहकरणेत्वरिकाऽपरिगृहीता-परिगृहीतागमनानङ्गक्रीडाकामतीव्राभिनिवेशाः।।२८।। क्षेत्रवास्तुहिरण्यसुवर्णधन-धान्यदासीदासकुप्यप्रमाणातिक्रमाः।।२९।। ऊर्ध्वाधस्तिर्यग्व्यतिक्रमक्षेत्रवृद्धिस्मृत्य-न्तराधानानि।।३०।। आनयनप्रेष्यप्रयोगशब्दरूपानुपातपुद्गलक्षेपाः।।३१।। कन्दर्प-कौत्कुच्यमौखर्यासमीक्ष्याधिकरणोपभोगपरिभोगानर्थक्यानि।।३२।। योगदुष्प्रणिधा-

नानादरस्मृत्यनुपस्थानानि।।३३।। अप्रत्यवेक्षिताऽप्रमार्जितोत्सर्गादानसंस्तरोप-क्रमणानादरस्मृत्यनुपस्थानानि।।३४।। सचित्तसम्बन्धसम्मिश्राभिषवदुष्पक्वा-हाराः।।३५।। सचित्तनिक्षेपापिधानपरव्यपदेशमात्सर्यकालातिक्रमाः।।३६।। जीवितमरणाशंसामित्रानुरागसुखानुबन्धनिदानानि।।३७।। अनुग्रहार्थं स्वस्यातिसर्गो दानम्।।३८।। विधिद्रव्यदातृपात्रविशेषात्तद्विशेषः।।३९।।

**इति तत्त्वार्थसूत्रे सप्तमोऽध्यायः।।७।।**

मिथ्यादर्शनाविरतिप्रमादकषाययोगा बन्धहेतवः।।१।। सकषायत्वाज्जीवः कर्मणो योग्यान् पुद्गलानादत्ते स बन्धः।।२।। प्रकृतिस्थित्यनुभवप्रदेशास्तद्विधयः।।३।। आद्यो ज्ञानदर्शनावरणवेदनीयमोहनीयायुर्नामगोत्रान्तरायाः।।४।। पञ्चनवद्व्यष्टाविंशति-चतुर्द्विचत्वारिंशद्द्विपञ्चभेदा यथाक्रमम्।।५।। मतिश्रुतावधिमनःपर्ययकेवलानाम्।।६।। चक्षुरचक्षुरवधिकेवलानां निद्रानिद्रानिद्राप्रचलाप्रचलाप्रचलास्त्यानगृद्धयश्च।।७।। सदसद्वेद्ये।।८।। दर्शनचारित्रमोहनीयाकषायकषायवेदनीयाख्यास्त्रिद्विनवषोडशभेदाः सम्यक्त्वमिथ्यात्वतदुभयान्यकषायकषायौ हास्यरत्यरतिशोकभयजुगुप्सास्त्रीपुन्न-पुंसकवेदा अनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानसञ्ज्वलनविकल्पाश्चैकशः क्रोधमानमायालोभाः।।९।। नारकतैर्यग्योनमानुषदैवानि।।१०।। गतिजातिशरीराङ्गोपाङ्ग-निर्माणबन्धनसङ्घातसंस्थानसंहननस्पर्शरसगन्धवर्णानुपूर्व्यागुरुलघूपघातपरघाता-तपोद्योतोच्छ्वासविहायोगतयः प्रत्येकशरीरत्रससुभगसुस्वरशुभसूक्ष्मपर्याप्तिस्थिरा-देययशःकीर्त्तिसेतराणि तीर्थकरत्वं च।।११।। उच्चैर्नीचैश्च।।१२।। दानलाभभोगोप-भोगवीर्याणाम्।।१३।। आदितस्तिसृणामन्तरायस्य च त्रिंशत्सागरोपमकोटीकोट्यः परा स्थितिः।।१४।। सप्ततिर्मोहनीयस्य।।१५।। विंशतिर्नामगोत्रयोः।।१६।। त्रयस्त्रिं-शत्सागरोपमाण्यायुषः।।१७।। अपरा द्वादश मुहूर्त्ता वेदनीयस्य।।१८।। नामगोत्र-योरष्टौ।।१९।। शेषाणामन्तर्मुहूर्त्ता।।२०।। विपाकोऽनुभवः।।२१।। स यथा-नाम।।२२।। ततश्च निर्जरा।।२३।। नामप्रत्ययाः सर्वतो योगविशेषात् सूक्ष्मैक-क्षेत्रावगाहस्थिताः सर्वात्मप्रदेशेष्वनन्तानन्तप्रदेशाः।।२४।। सद्वेद्यशुभायुर्नामगोत्राणि पुण्यम्।।२५।। अतोऽन्यत्पापम्।।२६।।

**इति तत्त्वार्थसूत्रे अष्टमोऽध्यायः।।८।।**

आस्रवनिरोधः संवरः।।१।। स गुप्तिसमितिधर्मानुप्रेक्षापरीषहजयचारित्रैः।।२।। तपसा निर्जरा च।।३।। सम्यग्योगनिग्रहो गुप्तिः।।४।। ईर्याभाषैषणादाननिक्षेपोत्सर्गाः

समितयः।।५।। उत्तमक्षमामार्दवार्जवशौचसत्यसंयमतपस्त्यागाकिञ्चन्यब्रह्मचर्याणि धर्मः।।६।। अनित्याशरणसंसारैकत्वान्यत्वाशुच्यास्रवसंवरनिर्जरालोकबोधिदुर्लभ-धर्मस्वाख्यातत्वानुचिन्तनमनुप्रेक्षाः।।७।। मार्गाच्यवननिर्जरार्थं परिषोढव्याः परी-षहाः।।८।। क्षुत्पिपासाशीतोष्णदंशमशकनाग्न्यारतिस्त्रीचर्यानिषद्याशय्याक्रोशवधया-चनालाभरोगतृणस्पर्शमलसत्कारपुरस्कारप्रज्ञाज्ञानादर्शनानि।।९।। सूक्ष्मसाम्परायच्छ-द्मस्थवीतरागयोश्चतुर्दश।।१०।। एकादश जिने।।११।। बादरसाम्पराये सर्वे।।१२।। ज्ञानावरणे प्रज्ञाऽज्ञाने।।१३।। दर्शनमोहान्तराययोरदर्शनालाभौ।।१४।। चारित्रमोहे नाग्न्यारतिस्त्रीनिषद्याक्रोशयाचनासत्कारपुरस्काराः।।१५।। वेदनीये शेषाः।।१६।। एकादयो भाज्या युगपदेकस्मिन्नैकोनविंशतेः।।१७।। सामायिकच्छेदोपस्थापना-परिहारविशुद्धिसूक्ष्मसाम्पराययथाख्यातमिति चारित्रम्।।१८।। अनशनावमौदर्यवृत्ति-परिसङ्ख्यानरसपरित्यागविविक्तशय्यासनकायक्लेशा बाह्यं तपः।।१९।। प्रायश्चित्त-विनयवैयावृत्त्यस्वाध्यायव्युत्सर्गध्यानान्युत्तरम्।।२०।। नवचतुर्दशपञ्चद्विभेदा यथाक्रमं प्राग्ध्यानात्।।२१।। आलोचनप्रतिक्रमणतदुभयविवेकव्युत्सर्गतपश्छेदपरिहारोप-स्थापनाः।।२२।। ज्ञानदर्शनचारित्रोपचाराः।।२३।। आचार्योपाध्यायतपस्विशैक्षग्लान-गणकुलसङ्घसाधुमनोज्ञानाम्।।२४।। वाचनाप्रच्छनानुप्रेक्षाऽऽम्नाय-धर्मोपदेशाः।।२५।। बाह्याभ्यन्तरोपध्योः।।२६।। उत्तमसंहननस्यैकाग्रचिन्तानिरोधो ध्यानमान्तर्मुहूर्तात्।।२७।। आर्त्तरौद्रधर्म्यशुक्लानि।।२८।। परे मोक्षहेतू।।२९।। आर्त्तममनोज्ञस्य सम्प्रयोगे तद्विप्रयोगाय स्मृतिसमन्वाहारः।।३०।। विपरीतं मनोज्ञस्य।।३१।। वेदनायाश्च।।३२।। निदानं च।।३३।। तदविरतदेशविरतप्रमत्त-संयतानाम्।।३४।। हिंसानृतस्तेयविषयसंरक्षणेभ्यो रौद्रमविरतदेशविरतयोः।।३५।। आज्ञापायविपाकसंस्थानविचयाय धर्म्यम्।।३६।। शुक्ले चाद्ये पूर्वविदः।।३७।। परे केवलिनः।।३८।। पृथक्त्वैकत्ववितर्कसूक्ष्मक्रियाप्रतिपातिव्युपरतक्रियानिवर्ती-नि।।३९।। त्र्येकयोगकाययोगाऽयोगानाम्।।४०।। एकाश्रये सवितर्कवीचारे पूर्वे।।४१।। अवीचारं द्वितीयम्।।४२।। वितर्कः श्रुतम्।।४३।। वीचारोऽर्थव्यञ्जनयोगसङ्-क्रान्तिः।।४४।। सम्यग्दृष्टिश्रावकविरतानन्तवियोजकदर्शनमोहक्षपकोपशमकोपशान्त-मोहक्षपकक्षीणमोहजिनाः क्रमशोऽसङ्ख्येयगुणनिर्जराः।।४५।। पुलाकबकुशकुशील-निर्ग्रन्थस्नातका निर्ग्रन्थाः।।४६।। संयमश्रुतप्रतिसेवनातीर्थलिङ्गलेश्योपपादस्थान-विकल्पतः साध्याः।।४७।।

**इति तत्त्वार्थसूत्रे नवमोऽध्यायः।।९।।**

मोहक्षयाज्ज्ञानदर्शनावरणान्तरायक्षयाच्च केवलम्।।१।। बन्धहेत्वभावनिर्जराभ्यां कृत्स्नकर्मविप्रमोक्षो मोक्षः।।२।। औपशमिकादिभव्यत्वानां च।।३।। अन्यत्र केवलसम्यक्त्वज्ञानदर्शनसिद्धत्वेभ्यः।।४।। तदनन्तरमूर्ध्वं गच्छत्यालोकान्तात्।।५।। पूर्वप्रयोगादसङ्गत्वाद् बन्धच्छेदात्तथागतिपरिणामाच्च।।६।। आविद्धकुलालचक्र-वद्व्यपगतलेपालाबुवदेरण्डबीजवदग्निशिखावच्च।।७।। धर्मास्तिकायाभावात्।।८।। क्षेत्रकालगतिलिङ्गतीर्थचारित्रप्रत्येकबुद्धबोधितज्ञानावगाहनान्तरसङ्ख्याल्पबहुत्वतः साध्याः।।९।।

**इति तत्त्वार्थसूत्रे दशमोऽध्यायः।।१०।।**

कोटिशतं द्वादश चैव कोट्यो लक्ष्याण्यशीतिस्त्र्यधिकानि चैव।
पञ्चाशदष्टौ च सहस्रसङ्ख्यामेतच्छ्रुतं पञ्चपदं नमामि।।
अरहंतभासियत्थं गणहरदेवेहिं गंथियं सव्वं।
पणमामि भत्तिजुत्तो, सुदणाणमहोवयं सिरसा।।
अक्षरमात्रपदस्वरहीनं व्यञ्जनसन्धिविवर्जितरेफम्।
साधुभिरत्र मम क्षमितव्यं को न विमुह्यति शास्त्रसमुद्रे।।
दशाध्यायपरिच्छिन्ने तत्त्वार्थे पठिते सति।
फलं स्यादुपवासस्य भाषितं मुनिपुङ्गवैः।।
तत्त्वार्थसूत्रकर्त्तारं गृद्धपिच्छोपलक्षितम्।
वन्दे गणीन्द्रसञ्जातमुमास्वामिमुनीश्वरम्।।
जं सक्कइ तं कीरइ, जं च ण सक्कइ तहेव सद्दहणं।
सद्दहमाणो जीवो, पावइ अजरामरं ठाणं।।
तवयरणं वयधरणं, संजमसरणं च जीवदयाकरणं।
अंते समाहिमरणं, चउविहदुक्खं णिवारेई।।

-●-

# तत्त्वार्थसूत्रम्

# Tattvārthasūtram

## परिशिष्ट : द्वितीय

## Appendix No. 2

## तत्त्वार्थसूत्रगत सूत्रों का अकारादि क्रम

## Alphabetic order of Sūtras of Tattvārthasūtra

| | |
|---|---|
| अगार्यनगारश्च | ७।१९ |
| अजीवकाया धर्माधर्माकाश- | ५।१ |
| अणवः स्कन्धाश्च | ५।२५ |
| अणुव्रतोऽगारी | ७।२० |
| अतोऽन्यत्पापम् | ८।२६ |
| अदत्तादानं स्तेयम् | ७।१५ |
| अधिकरणं जीवाजीवाः | ६।७ |
| अनन्तगुणे परे | २।३९ |
| अनशनावमौदर्य- | ९।१९ |
| अनादिसम्बन्धे च | २।४१ |
| अनित्याशरण- | ९।७ |
| अनुग्रहार्थं स्वस्यातिसर्गो | ७।३८ |
| अनुश्रेणि गतिः | २।२६ |
| अन्यत्र केवलसम्यक्त्व- | १०।४ |
| अपरा द्वादश मुहूर्त्ता | ८।१८ |
| अपरा पल्योपममधिकम् | ४।३३ |
| अप्रतीघाते | २।४० |
| अप्रत्यवेक्षिताऽप्रमार्जितो- | ७।३४ |
| अर्थस्य | १।१७ |
| अर्पितानर्पितसिद्धेः | ५।३२ |
| अल्पारम्भपरिग्रहत्वं | ६।१७ |
| अवग्रहेहाऽवायधारणाः | १।१५ |
| अविग्रहा जीवस्य | २।२७ |
| अवीचारं द्वितीयम् | ९।४२ |
| असङ्ख्येयभागादिषु | ५।१५ |
| असङ्ख्येयाः प्रदेशा | ५।८ |
| असदभिधानमनृतम् | ७।१४ |
| आ आकाशादेकद्रव्याणि | ५।६ |
| आकाशस्यानन्ताः | ५।९ |
| आकाशस्यावगाहः | ५।१८ |
| आचार्योपाध्यायतपस्वि- | ९।२४ |
| आज्ञापायविपाकसंस्थान- | ९।३६ |
| आदितस्तिसृणामन्तरायस्य च | ८।१४ |
| आदितस्त्रिषु पीतान्तलेश्याः | ४।२ |
| आद्यं संरम्भसमारम्भा- | ६।८ |
| आद्ये परोक्षम् | १।११ |
| आद्यो ज्ञानदर्शनावरण- | ८।४ |
| आनयनप्रेष्यप्रयोग- | ७।३१ |
| आरणाच्युतादूर्ध्वमेकैकेन- | ४।३२ |
| आर्त्तममनोज्ञस्य | ९।३० |

आर्त्तरौद्रधर्म्यशुक्लानि ९।२८
आर्या म्लेच्छाश्च ३।३६
आलोचनप्रतिक्रमण– ९।२२
आविद्धकुलालचक्रवद्– १०।७
आस्रवनिरोधः संवरः ९।१
इन्द्रसामानिकत्रायस्त्रिंश– ४।४
इन्द्रियकषायाव्रतक्रियाः ६।५
ईर्याभाषैषणादान– ९।५
उच्चैर्नीचैश्च ८।१२
उत्तमक्षमामार्दवार्जव– ९।६
उत्तमसंहननस्यैकाग्र– ९।२७
उत्तरा दक्षिणतुल्याः ३।२६
उत्पादव्ययध्रौव्ययुक्तं सत् ५।३०
उपयोगो लक्षणम् २।८
उपर्युपरि ४।१८
ऊर्ध्वाधस्तिर्यग्व्यतिक्रम– ७।३०
ऋजुविपुलमती मनःपर्ययः १।२३
एकं द्वौ त्रीन्वाऽनाहारकः २।३०
एकद्वित्रिपल्योपमस्थितयो ३।२९
एकप्रदेशादिषु भाज्यः ५।१४
एकसमयाऽविग्रहा २।२९
एकादयो भाज्या– ९।१७
एकादश जिने ९।११
एकादीनि भाज्यानि १।३०
एकाश्रये सवितर्कवीचारे– ९।४१
औदारिकवैक्रियिकाहारक– २।३६
औपपादिकं वैक्रियिकम् २।४६
औपपादिकचरमोत्तम– २।५३
औपपादिकमनुष्येभ्यः ४।२७
औपशमिकक्षायिकौ भावौ २।१
औपशमिकादिभव्यत्वानां च १०।३
कन्दर्पकौत्कुच्यमौखर्या– ७।३२
कल्पोपपन्नाः कल्पातीताश्च ४।१७
कषायोदयात्तीव्रपरिणाम– ६।१४
कायप्रवीचारा आ ऐशानात् ४।७
कायवाङ्मनःकर्म योगः ६।१
कालश्च ५।३९
कृमिपिपीलिकाभ्रमर– २।२३
केवलिश्रुतसङ्घधर्म– ६।१३
क्रोधलोभभीरुत्व– ७।५
क्षयोपशमनिमित्तः १।२२
क्षुत्पिपासाशीतोष्ण– ९।९
क्षेत्रकालगतिलिङ्गतीर्थ– १०।९
क्षेत्रवास्तुहिरण्यसुवर्ण– ७।२९
गङ्गासिन्धुरोहिद्रोहितास्या– ३।२०
गतिकषायलिङ्ग– २।६
गतिजातिशरीराङ्गोपाङ्ग– ८।११
गतिशरीरपरिग्रहाभिमानतो ४।२१
गतिस्थित्युपग्रहौ ५।१७
गर्भसम्मूर्च्छनजमाद्यम् २।४५
गुणपर्ययवद् द्रव्यम् ५।३८
गुणसाम्ये सदृशानाम् ५।३५
चक्षुरचक्षुरवधिकेवलानां ८।७
चतुर्दशनदीसहस्रपरिवृता ३।२३
चारित्रमोहे नाग्न्यारति– ९।१५
जगत्कायस्वभावौ वा ७।१२

| | |
|---|---|
| जम्बूद्वीपलवणोदादयः | ३।७ |
| जरायुजाण्डजपोतानां गर्भः | २।३३ |
| जीवभव्याभव्यत्वानि च | २।७ |
| जीवाजीवास्रवबन्धसंवर- | १।४ |
| जीवाश्च | ५।३ |
| जीवितमरणाशंसा- | ७।३७ |
| ज्ञानदर्शनचारित्रोपचाराः | ९।२३ |
| ज्ञानदर्शनदानलाभ- | २।४ |
| ज्ञानाज्ञानदर्शनलब्ध्यश्चतुस्त्रि- | २।५ |
| ज्ञानावरणे प्रज्ञाऽज्ञाने | ९।१३ |
| ज्योतिष्काः सूर्याचन्द्रमसौ- | ४।१२ |
| ज्योतिष्काणां च | ४।४० |
| ततश्च निर्जरा | ८।२३ |
| तत्कृतः कालविभागः | ४।१४ |
| तत्त्वार्थश्रद्धानं सम्यग्दर्शनम् | १।२ |
| तत्प्रदोषनिह्नव- | ६।१० |
| तत्प्रमाणे | १।१० |
| तत्स्थैर्यार्थं भावनाः- | ७।३ |
| तथोत्तराः | ३।३० |
| तदनन्तभागे मनःपर्ययस्य | १।२८ |
| तदनन्तरमूर्ध्वं | १०।५ |
| तदविरतदेशविरत- | ९।३४ |
| तदष्टभागोऽपरा | ४।४१ |
| तदादीनि भाज्यानि- | २।४३ |
| तदिन्द्रियानिन्द्रियनिमित्तम् | १।१४ |
| तद्द्विगुणद्विगुणविस्तारा- | ३।२५ |
| तद्द्विगुणद्विगुणा ह्रदाः- | ३।१८ |
| तद्भावः परिणामः | ५।४२ |
| तद्भावाव्ययं नित्यम् | ५।३१ |
| तद्विपरीतं शुभस्य | ६।२३ |
| तद्विपर्ययो नीचैर्वृत्त्यनुत्सेकौ- | ६।२६ |
| तद्विभाजिनः पूर्वापरायता- | ३।११ |
| तन्निवासिन्यो देव्यः श्रीह्री- | ३।१९ |
| तन्निसर्गादधिगमाद्वा | १।३ |
| तन्मध्ये मेरुनाभिर्वृत्तो- | ३।९ |
| तन्मध्ये योजनं पुष्करम् | ३।१७ |
| तपसा निर्जरा च | ९।३ |
| ताभ्यामपरा भूमयो- | ३।२८ |
| तासु त्रिंशत्पञ्चविंशति- | ३।२ |
| तिर्यग्योनिजानां च | ३।३९ |
| तीव्रमन्दज्ञाताऽज्ञातभावा- | ६।६ |
| तेष्वेकत्रिसप्तदशसप्तदश- | ३।६ |
| तैजसमपि | २।४८ |
| त्रयस्त्रिंशत्सागरोपमाण्यायुषः | ८।१७ |
| त्रायस्त्रिंशलोकपालवर्ज्या- | ४।५ |
| त्रिसप्तनवैकादशत्रयोदश- | ४।३१ |
| त्र्येकयोगकाययोगाऽयोगानाम् | ९।४० |
| दर्शनचारित्रमोहनीया- | ८।९ |
| दर्शनमोहान्तराययो- | ९।१४ |
| दर्शनविशुद्धिर्विनयसम्पन्नता- | ६।२४ |
| दशयोजनावगाहः | ३।१६ |
| दशवर्षसहस्राणि प्रथमायाम् | ४।३६ |
| दशाष्टपञ्चद्वादशविकल्पाः | ४।३ |
| दानलाभभोगोपभोग- | ८।१३ |
| दिग्देशानर्थदण्डविरति- | ७।२१ |

| | |
|---|---|
| दुःखमेव वा | ७।१० |
| दुःखशोकतापाक्रन्दन- | ६।११ |
| देवनारकाणामुपपादः | २।३४ |
| देवाश्चतुर्णिकायाः | ४।१ |
| देशसर्वतोऽणुमहती | ७।२ |
| द्रव्याणि | ५।२ |
| द्रव्याश्रया निर्गुणा गुणाः | ५।४१ |
| द्वयोर्द्वयोः पूर्वाः पूर्वगाः | ३।२१ |
| द्विनवाष्टादशैकविंशति- | २।२ |
| द्विर्द्विर्विष्कम्भाः पूर्वपूर्व- | ३।८ |
| द्विर्धातकीखण्डे | ३।३३ |
| द्विविधानि | २।१६ |
| द्वीन्द्रियादयस्त्रसाः | २।१४ |
| द्व्यधिकादिगुणानां तु | ५।३६ |
| धर्माधर्मयोः कृत्स्ने | ५।१३ |
| धर्मास्तिकायाभावात् | १०।८ |
| न चक्षुरनिन्द्रियाभ्याम् | १।१९ |
| न जघन्यगुणानाम् | ५।३४ |
| न देवाः | २।५१ |
| नवचतुर्दशपञ्चद्वि- | ९।२१ |
| नाणोः | ५।११ |
| नामगोत्रयोरष्टौ | ८।१९ |
| नामप्रत्ययाः सर्वतो | ८।२४ |
| नामस्थापनाद्रव्यभाव- | १।५ |
| नारकतैर्यग्योनमानुषदैवानि | ८।१० |
| नारकसम्मूर्च्छिनो नपुंसकानि | २।५० |
| नारकाणां च द्वितीयादिषु | ४।३५ |
| नारका नित्याशुभतरलेश्या- | ३।३ |
| निःशल्यो व्रती | ७।१८ |
| निःशीलव्रतत्वं च सर्वेषाम् | ६।१९ |
| नित्यावस्थितान्यरूपाणि | ५।४ |
| निदानं च | ९।३३ |
| निरुपभोगमन्त्यम् | २।४४ |
| निर्देशस्वामित्वसाधना- | १।७ |
| निर्वर्तनानिक्षेपसंयोगनिसर्गा- | ६।९ |
| निर्वृत्त्युपकरणे द्रव्येन्द्रियम् | २।१७ |
| निष्क्रियाणि च | ५।७ |
| नृस्थिती परावरे | ३।३८ |
| नैगमसङ्ग्रहव्यवहारर्जुसूत्र- | १।३३ |
| पञ्चनवद्व्यष्टाविंशति- | ८।५ |
| पञ्चेन्द्रियाणि | २।१५ |
| पद्ममहापद्मतिगिञ्छ- | ३।१४ |
| परं परं सूक्ष्मम् | २।३७ |
| परतः परतः पूर्वा- | ४।३४ |
| परविवाहकरणेत्वरिका- | ७।२८ |
| परस्परोदीरितदुःखाः | ३।४ |
| परस्परोपग्रहो जीवानाम् | ५।२१ |
| परात्मनिन्दाप्रशंसे | ६।२५ |
| परा पल्योपममधिकम् | ४।३९ |
| परे केवलिनः | ९।३८ |
| परेऽप्रवीचाराः | ४।९ |
| परे मोक्षहेतू | ९।२९ |
| पीतपद्मशुक्ललेश्या- | ४।२२ |
| पुलाकबकुशकुशील- | ९।४६ |
| पुष्करार्द्धे च | ३।३४ |
| पूर्वप्रयोगादसङ्गत्वाद्- | १०।६ |

| | | | |
|---|---|---|---|
| पूर्वयोर्द्वीन्द्राः | ४।६ | भवनेषु च | ४।३७ |
| पृथक्त्वैकत्ववितर्क- | ९।३९ | भवप्रत्ययोऽवधिर्देव- | १।२१ |
| पृथिव्यप्तेजोवायु- | २।१३ | भूतव्रत्यनुकम्पादान- | ६।१२ |
| प्रकृतिस्थित्यनुभवप्रदेशाः- | ८।३ | भेदसङ्घाताभ्यां चाक्षुषः | ५।२८ |
| प्रत्यक्षमन्यत् | १।१२ | भेदसङ्घातेभ्य उत्पद्यन्ते | ५।२६ |
| प्रथमो योजनसहस्रायाम- | ३।१५ | भेदादणुः | ५।२७ |
| प्रदेशतोऽसङ्ख्येयगुणं प्राक्- | २।३८ | मणिविचित्रपार्श्वा उपरि- | ३।१३ |
| प्रदेशसंहारविसर्प्पाभ्यां- | ५।१६ | मतिः स्मृतिः सञ्ज्ञा चिन्ता- | १।१३ |
| प्रमत्तयोगात् प्राणव्यपरोपणं- | ७।१३ | मतिश्रुतयोर्निबन्धो- | १।२६ |
| प्रमाणनयैरधिगमः | १।६ | मतिश्रुतावधयो विपर्ययश्च | १।३१ |
| प्राग् ग्रैवेयकेभ्यः कल्पाः | ४।२३ | मतिश्रुतावधिमनःपर्यय- | १।९ |
| प्राङ् मानुषोत्तरान्मनुष्याः | ३।३५ | मतिश्रुतावधिमनःपर्यय- | ८।६ |
| प्रायश्चित्तविनयवैयावृत्त्य- | ९।२० | मनोज्ञामनोज्ञेन्द्रियविषय- | ७।८ |
| बन्धवधच्छेदातिभारारोपणा- | ७।२५ | माया तैर्यग्योनस्य | ६।१६ |
| बन्धहेत्वभावनिर्जराभ्यां- | १०।२ | मारणान्तिकीं सल्लेखनां- | ७।२२ |
| बन्धेऽधिकौ पारिणामिकौच | ५।३७ | मार्गाच्यवननिर्जरार्थं- | ९।८ |
| बहिरवस्थिताः | ४।१५ | मिथ्यादर्शनाविरतिप्रमाद- | ८।१ |
| बहुबहुविधक्षिप्राऽनिःसृता- | १।१६ | मिथ्योपदेशरहोभ्याख्यान- | ७।२६ |
| बह्वारम्भपरिग्रहत्वं नारक- | ६।१५ | मूर्च्छा परिग्रहः | ७।१७ |
| बादरसाम्पराये सर्वे | ९।१२ | मेरुप्रदक्षिणा नित्यगतयो | ४।१३ |
| बाह्याभ्यन्तरोपध्योः | ९।२६ | मैत्रीप्रमोदकारुण्य- | ७।११ |
| ब्रह्मलोकालया लौकान्तिकाः | ४।२४ | मैथुनमब्रह्म | ७।१६ |
| भरतः षड्विंशतिपञ्चयोजन- | ३।२४ | मोहक्षयाज्ज्ञानदर्शनावरणा | १०।१ |
| भरतस्य विष्कम्भो जम्बूद्वीपस्य | ३।३२ | योगदुष्प्रणिधानानादर- | ७।३३ |
| भरतहैमवतहरिविदेह- | ३।१० | योगवक्रता विसंवादनं- | ६।२२ |
| भरतैरावतयोर्वृद्धिह्रासौ | ३।२७ | रत्नशर्करावालुकापङ्कधूम- | ३।१ |
| भरतैरावतविदेहाः | ३।३७ | रूपिणः पुद्गलाः | ५।५ |
| भवनवासिनोऽसुरनाग- | ४।१० | रूपिष्ववधेः | १।२७ |

| | |
|---|---|
| लब्धिप्रत्ययं च | २।४७ |
| लब्ध्युपयोगौ भावेन्द्रियम् | २।१८ |
| लोकाकाशेऽवगाहः | ५।१२ |
| लौकान्तिकानामष्टौ | ४।४२ |
| वनस्पत्यन्तानामेकम् | २।२२ |
| वर्तनापरिणामक्रियाः परत्वा | ५।२२ |
| वाङ्मनोगुप्तीर्यादान- | ७।४ |
| वाचनाप्रच्छनानुप्रेक्षा- | ९।२५ |
| विग्रहगतौ कर्मयोगः | २।२५ |
| विग्रहवती च संसारिणः | २।२८ |
| विघ्नकरणमन्तरायस्य | ६।२७ |
| विजयादिषु द्विचरमाः | ४।२६ |
| वितर्कः श्रुतम् | ९।४३ |
| विदेहेषु सङ्ख्येयकालाः | ३।३१ |
| विधिद्रव्यदातृपात्रविशेषात्- | ७।३९ |
| विपरीतं मनोज्ञस्य | ९।३१ |
| विपाकोऽनुभवः | ८।२१ |
| विंशतिर्नामगोत्रयोः | ८।१६ |
| विशुद्धिक्षेत्रस्वामिविषयेभ्यो- | १।२५ |
| विशुद्ध्यप्रतिपाताभ्याम् | १।२४ |
| वीचारोऽर्थव्यञ्जनयोग- | ९।४४ |
| वेदनायाश्च | ९।३२ |
| वेदनीये शेषाः | ९।१६ |
| वैमानिकाः | ४।१६ |
| व्रतशीलेषु पञ्च पञ्च यथाक्रमम् | ७।२४ |
| व्यञ्जनस्यावग्रहः | १।१८ |
| व्यन्तराः किन्नरकिम्पुरुष- | ४।११ |
| व्यन्तराणां च | ४।३८ |
| शङ्काकाङ्क्षाविचिकित्सा- | ७।२३ |
| शब्दबन्धसौक्ष्म्यस्थौल्य- | ५।२४ |
| शरीरवाङ्मनःप्राणा- | ५।१९ |
| शुक्ले चाद्ये पूर्वविदः | ९।३७ |
| शुभं विशुद्धमव्याघाति- | २।४९ |
| शुभः पुण्यस्याशुभः पापस्य | ६।३ |
| शून्यागारविमोचितावास- | ७।६ |
| शेषाः स्पर्शरूपशब्द- | ४।८ |
| शेषाणां सम्मूर्च्छनम् | २।३५ |
| शेषाणामन्तर्मुहूर्त्ता | ८।२० |
| शेषास्त्रिवेदाः | २।५२ |
| शेषास्त्वपरगाः | ३।२२ |
| श्रुतं मतिपूर्वं द्व्यनेक- | १।२० |
| श्रुतमनिन्द्रियस्य | २।२१ |
| संयमश्रुतप्रतिसेवनातीर्थ | ९।४७ |
| संसारिणस्त्रसस्थावराः | २।१२ |
| संसारिणो मुक्ताश्च | २।१० |
| स आस्रवः | ६।२ |
| सकषायत्वाज्जीवः कर्मणः | ८।२ |
| सकषायाकषाययोः- | ६।४ |
| सङ्क्लिष्टासुरोदीरित- | ३।५ |
| सङ्ख्येयासङ्ख्येयाश्च- | ५।१० |
| स गुप्तिसमितिधर्मानुप्रेक्षा- | ९।२ |
| सचित्तनिक्षेपापिधान- | ७।३६ |
| सचित्तशीतसंवृताः सेतराः- | २।३२ |
| सचित्तसम्बन्धसम्मिश्रा- | ७।३५ |

| | |
|---|---|
| सञ्ज्ञिनः समनस्काः | २।२४ |
| सत्सङ्ख्याक्षेत्रस्पर्शन– | १।८ |
| सदसतोरविशेषाद्यदृच्छोप– | १।३२ |
| सदसद्वेद्ये | ८।८ |
| सद् द्रव्यलक्षणम् | ५।२९ |
| स द्विविधोऽष्टचतुर्भेदः | २।९ |
| सद्वेद्यशुभायुर्नामगोत्राणि– | ८।२५ |
| सप्ततिर्मोहनीयस्य | ८।१५ |
| समनस्काऽमनस्काः | २।११ |
| सम्मूर्च्छनगर्भोपपादा जन्म | २।३१ |
| सम्यक्त्वं च | ६।२१ |
| सम्यक्त्वचारित्रे | २।३ |
| सम्यग्दर्शनज्ञानचारित्राणि | १।१ |
| सम्यग्दृष्टिश्रावकविरतानन्त– | ९।४५ |
| सम्यग्योगनिग्रहो गुप्तिः | ९।४ |
| स यथानाम | ८।२२ |
| सरागसंयमसंयमासंयमाकाम– | ६।२० |
| सर्वद्रव्यपर्यायेषु केवलस्य | १।२९ |
| सर्वस्य | २।४२ |
| सानत्कुमारमाहेन्द्रयोः सप्त | ४।३० |
| सामायिकच्छेदोपस्थापना– | ९।१८ |
| सारस्वतादित्यवह्न्यरुण– | ४।२५ |
| सुखदुःखजीवितमरणो– | ५।२० |
| सूक्ष्मसाम्परायच्छद्मस्थ– | ९।१० |
| सोऽनन्तसमयः | ५।४० |
| सौधर्मैशानयोः सागरोपमे– | ४।२९ |
| सौधर्मैशानसानत्कुमार– | ४।१९ |
| स्तेनप्रयोगतदाहृतादान– | ७।२७ |
| स्त्रीरागकथाश्रवण– | ७।७ |
| स्निग्धरूक्षत्वाद् बन्धः | ५।३३ |
| स्थितिप्रभावसुखद्युति– | ४।२० |
| स्थितिरसुरनागसुपर्णद्वीप– | ४।२८ |
| स्पर्शनरसनघ्राणचक्षुःश्रोत्राणि | २।१९ |
| स्पर्शरसगन्धवर्ण– | २।२० |
| स्पर्शरसगन्धवर्णवन्तः | ५।२३ |
| स्वभावमार्दवं च | ६।१८ |
| हिंसादिष्विहामुत्रापायावद्य– | ७।९ |
| हिंसानृतस्तेय विषय– | ९।३५ |
| हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्यो– | ७।१ |
| हेमार्जुनतपनीयवैडूर्यरजत– | ३।१२ |


–●–